योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०७५

पञ्चसप्ततितमः सर्गः ७५

श्रीवसिष्ठ उवाच ।

अथ तस्य गुरोर्वक्त्रादित्याकर्ण्य भगीरथः ।

मनस्याहितकर्तव्यः स्वव्यापारपरोऽभवत् ।। १

ततः कतिपयेष्वेव वासरेषु गतेषु सः ।

अग्निष्टोममखं चक्रे सर्वत्यागेकसिद्धये ।। २

गोभूम्यश्वहिरण्यादि ददौ धनमशेषतः ।

द्विजेभ्यो निजबन्धुभ्यो गुण्यगुण्यविचारयन् ।। ३

दिवसत्रयमात्रेण सर्वमेव परित्यजन् ।

असुमात्रावशेषोऽसावासीद्राजा भगीरथः ।। ४

अथ सर्वार्थरिक्तं तत्खिन्नप्रकृतिपौरकम् ।

सीमान्तिने तृणमिव राज्यं स्वमरये ददौ ।। ५

आक्रान्ते द्विषता राज्ये मुनिः सद्मनि मण्डले ।

अधोवासोवशेषोऽसौ निर्जगाम स्वमण्डलात् ।। ६

यत्र न ज्ञायते नाम्ना यत्र न ज्ञायते मुखात् ।

तत्र ग्रामेष्वरण्येषु दूरेषूवास धैर्यवान् ।। ७

इत्यल्पेनैव कालेन प्रशान्तसकलैषणः ।

परमेण शमेनासावाप विश्रान्तिमात्मनि ।। ८

भ्रमन्द्वीपानि भूपीठे कदाचित्कालयोगतः ।

अवशः शत्रुणाक्रान्तं स्वमेव प्राप तत्पुरम् ।। ९

नानागारांश्च तत्रासौ प्रवाहपतितांश्च तान् ।

पौरांश्च मन्त्रिणश्चैव शमी भिक्षामयाचत ।। 6.1.75.१०

विविदुस्ते नृपं पौरा मन्त्रिणश्च भगीरथम् ।

पूजयामासुरथ तं सविषादाः सपर्यया ।। ११

प्रभो राज्यं गृहाणेति प्रार्थितोऽप्यरिणा मुनिः ।

नादत्तेऽनादृताशेषस्तृणमप्यशनादृते ।। १२

कतिचिद्दिवसांस्तत्र नीत्वाऽन्यत्र जगाम सः ।

भगीरथोऽयं हा कष्टमिति लोकेन शोचितः ।। १३

अथान्यत्रोपशान्तात्मा परिविश्रान्तधीः सुखी ।

आत्मारामं कदाचित्तु स प्राप त्रितलं गुरुम् ।। १४

स्वमेव स्वागतं कृत्वा तेन सार्धं भगीरथः ।

कंचित्कालमुवासाद्रौ वने ग्रामे पुरे जने ।। १५

समतामुपयातौ तौ गुरुशिष्यौ समौ स्थितौ ।

कलयामासतुः स्वस्थौ विनोदं देहधारणम् १६

किमयं धार्यते देहः किं वानेनोज्झितेन नः ।

यथाक्रमं यथाचारं तिष्ठत्वेष यथास्थितम् ।। १७

इति निश्चित्य तिष्ठन्तौ तौ वनाद्वनगामिनौ ।

अनानन्दं परानन्दं नासुखं न च मध्यमम् ।। १८

धनानि वाजिविभवाद्यैश्वर्यं चाष्टधोदितम् ।

सिद्धैरप्यर्पितं तुष्टैर्मेनाते जर्जरं तृणम् ।। १९

स्वकर्मणैव देहोऽयं यावत्सत्त्वमनिच्छया ।

धारणीय इति स्वेन कर्मणैवाथ तस्थतुः ।। 6.1.75.२०

अभिननन्दतुरागतमुत्तमौ

निजसमाचरणक्रमजं मुनी ।

सुखमसौख्यमभीप्सितवर्जितौ

समसमेऽतिसमौ शमिनौ स्वतः ।। २१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० भगीरथनिर्वाणं नाम पञ्चसप्तसतितमः सर्ग ।।७५।।